માઇપૂજન

માર્કંડરાય રતનલાલ ધોળકિયા

माई-प्रकाशनमाला, अंक ३

માઈ-પૂજન

માર્કંડરાય રતનલાલ ધોળકિયા, એલ. સી. ઈ.
માઈમંડળના સંસ્થાપક,
સ્પેશ્યલ લૅન્ડ ઍક્વિઝિશન ઑફિસર, પૂના.

માઈમંડળ
અમદાવાદ

પ્રકાશક :
અમદાવાદ માઇમંડળ તરફથી
કૌશિકરામ વિઘ્નહરરામ મહેતા, બી. એ.
૨૧, ટીલકનગર, **અમદાવાદ.**

આવૃત્તી ૧ લી] ૧૯૪૦ [પ્રત ૫૦૦

ધી "ડાયમંડ જ્યુબિલી" પ્રિન્ટીંગ પ્રેસમાં
પરીખ સુરેશચંદ્ર પોપટલાલે છાપ્યું.
સલાપોસ રોડ—**અમદાવાદ.**

આમુખ

માઈમંડળ પ્રકાશનના અંક ૧ રૂપે **માઈતત્ત્વ,** અને અંક ર રૂપે **માઈકીર્તનમાળા; પ્રથમ શતક** પ્રકટ થયા પછી અંક ૩ રૂપે આજે **માઈપૂજન**ની પુણ્ય પુસ્તિકા પ્રકટ થાય છે.

" અનેક પ્રસંગોએ **माई, जय माई, ॐ श्रीं जय माई, ऐँ श्रीँ जय माई** એ મહાપ્રભાવશાલી મહામંત્રોની ઘોષણા કર્યા પછી આ વિસ્તારવાળા પૂજનની શી આવશ્યકતા છે ? " એ શંકા કોઈ કોઈ વ્યક્તિને થવાનો સંભવ છે. તેના સમાધાનમાં એટલું જણાવવું ઉચિત છે કે એ મહામંત્રોના પ્રભાવમાં ન્યૂનતા કરવાનો કર્તાશ્રીનો લેશ પણ આશય નથી. વસ્તુસ્થિતિ એવી છે કે માઈમંડળની અનેક શાખાઓમાં માઈપૂજનનો કાર્યક્રમ એક કલાકથી ત્રણ કે ચાર કલાક સુધી ચાલે છે. વિવિધ રસમય શ્રેયસ્કર અંગો એ લાંબા સમયની પરિપૂર્તિ કરવામાં સહાયક થઈ પડવાનો પૂર્ણ સંભવ છે એ કર્તાશ્રીના મંતવ્યપરત્વે બે મત હોઈ શકે નહિ.

ઉપાસનામાં અત્યંત મહત્ત્વના સ્થાનને પામી ચુકેલાં **खड्गमाला, ललितासहस्रनाम, त्रिशती** વગેરે સાહિત્યનો આ પ્રકાશનમાં સમાવેશ થાય છે.

અહિંના સુપ્રસિદ્ધ " ડાયમંડ જ્યુબિલી મુદ્રણાલય "ના માલેક, માઈતત્ત્વથી રંગાયલા હૃદયવાળા પ્રિય માઈબંધુ શ્રી પોપટલાલભાઈ દેવીદાસ પરીખની પૂર્ણ આર્થિક સહાયથી આ કૃતિ પ્રસિદ્ધિમાં આવે છે. એ બંધુવરનું સમગ્ર કુટુંબ માઈને શરણે છે, અને માઈની નિષ્કામ સેવામાં પરમ આનંદ માને છે. તેમનો આભાર મુક્તકંઠે માનીએ છીએ.

આશા છે કે માઈમય જીવન ગાળનાર, માઈમહાપુત્ર શ્રી માર્કંડ-ભાઈના વિશ્વપ્રેમી હૃદયનાં પાવન આંદોલનોથી અંકિત આ કૃતિ મોટા પાયા ઉપર સમાજને શ્રેયસ્કર થઈ પડશે.

માઈમંડળશાખા, ૨૧,
ટોલક–નગર, **અમદાવાદ.**
૨૮ : ૧ : ૧૯૪૦.

કૌશિકરામ વિઘ્નહરરામ મહેતા.

卐 जय माई 卐

माई—पूजन

માઈપૂજન ગમે ત્યારે અને ગમે તે સમયે થાય છે, પરંતુ તેનો ખાસ સમય, કે જે સમયે પોતે પોતાના ભક્તો પ્રત્યે ખાસ નજર કરે છે, તે સમય શુક્રવારની મધ્યરાત્રિનો છે. આ સમયથી બીજા નંબરનો સમય એટલે મંગળવાર સૂર્યોદય પહેલાંનો. તથા તેના પછીનો સમય રવિવાર સૂર્યાસ્ત પછીનો. એ રીતે સમયો ઉત્તમ, મધ્યમ અને કનિષ્ઠ છે. બાકી ગમે તે સમયે ગમે તે સ્થિતિમાં માઈજપ, માઈમંત્ર, માઈપૂજન તથા માઈપાઠ થઈ શકે છે.

માઈજપ, અથવા મંત્ર, અથવા પૂજન, અથવા પાઠ કરનારે મુખ્ય ભાવના, નિદાન તેટલો સમય, કઈ રાખવાની છે તે સંબંધમાં ઘણું સાહિત્ય છે. પરંતુ સંક્ષેપમાં નીચે પ્રમાણે છેઃ—

માઈ એટલે ઈશ્વર જ. માઈમંદિર અથવા માઈમંડળ એટલે ઈશ્વરને પોતાની જન્મમાતાની ભાવનાથી પ્રસન્ન કરનાર ભક્તો—માઈભક્તોનું—પૂજાસ્થાન તથા તેમનું મંડળ. સાધારણ રીતે જ્યાં એકજ કુટુંબનાં મનુષ્યો ભેગાં થઈને પોતાના ઘરમાં પોતાપુરતી પૂજા કરે છે તેનું નામ માઈમંદિર, અને જ્યાં જુદાં જુદાં કુટુંબોની વ્યક્તિઓ તથા અન્ય સગાંસંબંધી, કે ગમે તે પણ માઈભક્તો ભેગા થઈને પૂજન કરે છે તે સ્થાન અને તે સમુદાયને માઈમંડળ કહેવામાં આવે છે. અર્થાત્ માઈમંડળના ઘણા સભ્યોને ઘેર માઈમંદિર હોય છે.

માઈથી કોઇ પર નથી, માઈની તુલ્ય કોઈ નથી, માઈ કોઇ પણ કારણના કાર્યરૂપે નથી, માઈ ફક્ત વિશ્વજનની અર્થાત્ અમુક વિશ્વપુરતી તેની જનની તેમજ ફક્ત જનનીજ છે એમ નથી, માઈ શક્તિ નથી, શક્તિને નિયામક બીજી વ્યક્તિ હોય છે તેવું માઈ-પર સ્વામિત્વ કોઇનું નથી, માઈ પરમેશ્વરની દાસી નથી, કે કોઇની

પત્ની નથી, માઈ વામમાર્ગની ઉપાસ્ય નથી, માઈ જંત્ર મંત્ર તંત્રની અધિષ્ઠાત્રી નથી, જગતને ઉન્માર્ગે ચઢાવનારી માયાની કલ્પનારૂપ માઈ નથી, પંચાયતન દેવો હિંદુઓ પૂજે છે તે પૈકીની એક માઈ નથી, માઈ કાલી કે મહાલક્ષ્મી નથી, માઈ જીસસની મા મેરી નથી, રાક્ષસોના લોહીની તરસી માઈ નથી, કે જેની ઉપાસના કરીને અસુરો દેવોને સતાવે છે તે માઈ નથી.

માઈ ઉપર કહેલાં સર્વસ્વરૂપે છે, પણ કોઇ પણ એક સ્વરૂપે તેટલાજ પુરતી નથી. માઈ કરુણાનો સાગર છે, અને તેમાં ઉપર કહેલી સર્વ કલ્પનાઓ તરંગરૂપે છે. **માઈ એટલે તમારી પોતાની જન્મ આપનારી મા પ્રત્યે જે ભાવના હોય તે ભાવનાથી પૂજાતી ઈશ્વરની ઈશ્વરી ભાવના.**

માઈ હિંદુઓની જ નથી; માઈ આખા વિશ્વની છે. તેને જે "માઈ" તરીકે પૂજે તેની તે માઈ છે. બધાજ ધર્મોના સંસ્થાપકોની, બધા જ ધર્મોના અનુયાયીઓની તે માઈ છે.

માઈ તે અમુક જ નામ નથી. અમુક જ તેનું સ્વરૂપ નથી, અમુક જ તેનો પૂજનવિધિ નથી. સંત હૃદયના અંતર અવાજરૂપે માઈ છે. ચૈતન્ય, અંતઃકરણપ્રેરણા સવરૂપે માઈ છે. માઈ વિશ્વની સર્જનારી, પાલન કરનારી તથા સંહાર કરી ફરી સર્જનારી છે. સત્ત્વ, રજસ્ તથા તમસ્‌ના ગુણોથી તથા ઇચ્છા, જ્ઞાન તથા ક્રિયાની શક્તિથી જગત્ માત્રને લીલારૂપે રમાડનારી માઈ છે. સૂર્ય, ચંદ્ર, અગ્નિ તથા ઉષા એ માઈનાં સ્થૂળ સ્વરૂપો છે. ભક્ત લોકોએ પોતાની ભક્તિથી ચૈતન્યરૂપ બનાવી દીધેલી મૂર્તિ, છબી માઈ જ છે. મંત્ર માઈનું સૂક્ષ્મ સ્વરૂપ છે. યજ્ઞ માઈસ્વરૂપ છે, માઈમંદિર એ માઈસ્વરૂપ છે. ભક્તને આનંદ આપવા અથવા તેની ઇચ્છા પૂરી કરવા વખતો વખત સ્વરૂપો માઈ લે છે તે માઈસ્વરૂપ છે. ગુરુ માઈસ્વરૂપ છે. ગુરુઓનું સંમેલન માઈસ્વરૂપ છે. માઈપુસ્તક અથવા માઈનું મંદિર માઈસ્વરૂપ છે. કુદરત, કર્મ, કાયદો, ઈશ્વરીસત્તા, નસીબ,

કાળ, શકિત, મૂલ પ્રકૃતિ માઇસ્વરૂપ છે. મનુષ્યના શરીરમાં રહેલી કુંડલિની માઇસ્વરૂપ છે. વિશ્વજનતા માઇસ્વરૂપ છે. પિતારૂપે પૂજ્યલી પણ માઈ છે. માઈને જાતિ નથી. માઈ સગુણે છે અને નિર્ગુણે છે, અથવા તો સગુણે નથી, અને નિર્ગુણે નથી; માઈ સાકારે છે અને નિરાકારે છે, અથવા તો સાકારે નથી કે નિરાકારે નથી.

માઈ–ભક્તિમાં મુખ્ય ભાવના એ છે કે આપણે બધાજ એક માઇનાં, એકજ કુટુંબનાં સર્વે, કોઇ પણ ધર્મનાં ભાઈબેન છીએ. **આપણે જેટલે અંશે તે વિશ્વભ્રાતૃભાવ તથા વિશ્વભગિની-ભાવનું વ્યવહારમાં પાલન કરીએ છીએ તેટલે અંશે માઈ આપણા પર પ્રસન્ન થાય છે.** માઇમંડળમાં આવતાં પતિપત્ની પણ માઇમંદિરમાં હાજરીપર્યંત ભાઈ અને બ્હેન છે.

માઇમાર્ગના મુખ્ય સિદ્ધાંત પ્રેમ, સેવા, સામાન્ય ધર્મપાલન, ચારિત્ર્યસુધારણા, ભકિત તથા શરણાગતિ છે. માઇભકિત કરીને યશ તથા વિજય પ્રાપ્ત કરવા ઇચ્છનારાઓએ માઈ સિદ્ધાંત જ મુખ્યત્વે કરીને માનવા જોઈએ, તથા હૃદયમાં અને માન્યતામાં સ્થાપવા જોઈએ.

માઇમાનસ એટલે એક સીધું સરળ બાળકનું માનસ છે એમ બરાબર સમજવું જોઈએ. માઇમાનસમાં જંત્ર, તંત્ર, મંત્ર, છુ મંતરની મોટી મહત્તા નથી, નામ–સ્મરણની જ મહત્તા છે.

માઇમાર્ગ એટલે સીધો, સરળ, સડસડાટ વાંકું ચુકું વળ્યા વિના જવાનો માર્ગ. તેની માન્યતા આગળ કહ્યા પ્રમાણે એટલી જ કે આપણે એક માઇનાં બધાં બાળક છીએ. પ્રેમ, સેવા, ભકિત અને શરણાગતિ એ માઇમાર્ગના જીવનમંત્રો છે. એ મંત્રોને અનુસરીને જીવન જીવવાથી જ માઇકૃપા થાય છે. એ સંપૂર્ણ માન્યતા, જ્ઞાનભંડાર કરતાં ચારિત્ર્ય પર અત્યંત ભાર મુકનાર માર્ગ તે માઇમાર્ગ છે. એ માર્ગનો પૂજનવિધિ અમુક જ પ્રકારનો તો હોઈ શકે નહિ. તથાપિ આજ સુધી મોટો ભક્તવર્ગ હિંદુઓનો હોવાથી તે

વર્ગની ઇચ્છાનુસાર યોજાયશે વિધિ અહિં સૂચવવાનો નમ્ર પ્રયત્ન છે. કોઇએ એમ સમજવાની ભૂલ કરવી નહિ કે આ વિધિ, અથવા આ સ્તોત્રો, અથવા આ પાઠ, અથવા આજ મંત્રોથી માઈ પ્રસન્ન થાય. ભક્તો મુસ્લીમ હોત તો કુરાન અનુસાર સ્મરણ, પાઠ, પૂજનની યોજના થઈ હોત, અને ભવિષ્યમાં પણ માઇસ્મિરણ માટે જો જરૂર પડે તો બીજા ધર્મના ભક્તોને અનુકૂળ બીજી જાતની પણ માઈ-પૂજન થાય. નાના પાયાપર અત્યારે પણ જુદાં જુદાં માઇમંડળોમાં પણ જુદી જુદી રીતે માઇપૂજન થાય છે. અર્થાત્ મર્યાદાબદ્ધ કોઇ માઈ વિધિ નથી. જે રીતે હૃદય પવિત્રતાને વિશેષ પ્રાપ્ત કરે અને વિશેષ શુદ્ધ થાય, જે રીતે ભક્તિ વિશેષ સધાય, જે રીતે ઇચ્છાઓ વિશેષ સન્માર્ગને જ અનુસરે તે રીત તે વિધિ.

પરંતુ જેમાં વિધિ વિગેરેનો પ્રશ્ન જ ન રહે તેવી ભક્તિની એક રીત નામજપ તથા સહસ્રનામપઠનની છે. એ વિષે અહિં વિગતો આપવાનો પ્રયત્ન છે.

માઇમાર્ગની વિશિષ્ટતા, આજના યુગને માટે વિશિષ્ટ અનુકૂળતા ઇત્યાદિ અહિં આવશ્યક નથી. તે સંબંધી જાણ માટે અંગ્રેજી પુસ્તકો તેમજ "શક્તિ"ના લેખોમાંથી સારી માહિતી મળે એમ છે. હાલ અહિં તો ખાસ સંબંધપુરતું જ નિવેદન છે. **લલિતાસહસ્રનામ** પર ટીકા તથા માઇમાર્ગને અનુકૂળ અર્થ સમજાવનાર એક ગ્રંથ **માઈ તથા માઇસહસ્રનામ**ના શીર્ષકથી અંગ્રેજીમાં હાલ છપાઈ રહ્યો છે.

માઇપૂજન કરનારનું માનસ કેવું હોવું જોઇએ, માઇસંબંધે કલ્પના શી હોવી જોઈએ એ તો મુખ્ય ભૂમિકા છે. તે સંબંધી માન્યતા ઉપર કહેલી છે. તથાપિ ફરીથી લખવાનું કે માઇમાર્ગ એટલે માતાજીના માર્ગનું ફક્ત બીજું સુધરેલું નામ નથી. શક્તિ પ્રાપ્ત કરવાના ધ્યેય પર રચાયલા શાક્ત માર્ગનું માઇમાર્ગ ફક્ત બીજું નામ નથી. જ્યાં ત્યાં ઈશ્વરીની ભક્તિ કરો, અને ઈશ્વરીના ભક્તને

કશું પાપ પુણ્ય, સમાજના નિયમાદિ કાંઇ નડતા નથી એવી સમજ-
વાળા વામ માર્ગના સુધરેલા સ્વરૂપે માઇમાર્ગ નથી. માઇમાર્ગની ભાવના એ છે કે જેમ બાળક માને કાલાવાલા કરે, મા વિના કકળી ઉઠે, માના વિરહ આગળ તેને આખા વિશ્વનું સુખ તુચ્છ લાગે, મા પર અવિચળ વિશ્વાસ તથા શ્રદ્ધાથી નિરંતર આશાવાદીજ રહે, અને પ્રગતિ જોસભેર કર્યે જાય એ ધ્યેય, ભાવના તથા માન્યતા છે.

માતાજી પ્રસન્ન કરવા માટે **सप्तशती** એ આજથી હજારો વર્ષથી ચાલતો આવેલો ગ્રંથ છે. તેવોજ એક અત્યંત ગુપ્ત ગ્રંથ **ललितासहस्रनाम** છે. તેવો જ બીજો ગ્રંથ **खड्गमाला** નો છે. આ બધા ગ્રંથો એટલા ગુપ્ત છે કે તેના પર કંઇક બાવાઓએ અંધ શ્રદ્ધાવાળાઓને હાથમાં લીધેલા છે. અધિકાર વિના આ ગ્રંથનો અક્ષર પણ કોઇને કાને ના પડવો જોઇએ, ગુરુદ્વારાજ આનો ઉપદેશ થાય એવી કડક માન્યતા છે.

આ ત્રણે ગ્રંથોમાંથી જેમ ઠીક લાગ્યું તેમ માઈએ સ્વપ્ન-દ્વારા વખતો વખત આપેલી સૂચના પ્રમાણે જોડેની પાઠપૂજાની પ્રત અહિં રજુ કરું છું.

કહેવાની જરૂર નથી કે આ પાઠ પૂજન સેંકડોએ કરેલાં છે, અને કાંઇ ચમત્કારિક અનુભવો થઈ ગયલા છે. મારા પ્રિય માઇભક્ત શ્રીયુત કૌશિકરામભાઇના શબ્દોમાં બધા અનુભવો લખવા બેસીએ તો એક "એનસાઇક્લોપીડિયા" (બૃહદ્ ગ્રંથ) થાય.

માઇપૂજન માટે, પ્રથમથી જેઓ માઇના ભક્ત હોય તેમને ખબર આપવી. માઇભક્તોએ જો તેમની યથાશક્તિ ઇચ્છા હોય તો માઈ પાસે ખાલી હાથે જવું નહિ, કે જેથી ખાલી હાથે પાછા આવવું પડે. જે પ્રતીક અર્થાત્ છબિ ઓછામાં ઓછી નવ વાર પૂજાયલી હોય તેવી જ છબિ મુખ્ય સ્થાને પધરાવવી. પ્રથમ થોડા સંગીતથી શરૂઆત કરવી. માઇપૂજનના મુખ્ય પૂજકની સાધારણ ચાલતી આવેલી જ નીમણુક જેવું હોય અને હોવું જોઈએ, કે જે

માઈ છબી પાસે સ્થાન લે. પ્રથમ માઇભિકતોએ આણેલી સામગ્રી અર્થાત્ ફુલ, હાર, ફળ, ઇત્યાદિનો વિચાર કરી માઈ શોભા, માઈ-શૃંગાર તથા પ્રસાદની વ્યવસ્થા મનથી કરી નાંખવી. સાધારણ માન્યતા એવી હોવી જોઈએ કે નવ પાઇ, નવ પૈસા, નવ આના, નવ બેઆની, નવ પાવલી, નવ અર્ધા, નવ રૂપીઆ એમ યથાશક્તિ પ્રસાદાદિનો મનથી નિશ્ચય કરવો જોઈએ. નવ પાઇ અર્થાત્ ત્રણ પૈસા કોઇ પણ વ્યક્તિ અથવા આખા કુટુંબ માટે વધારે પડે નહિ, અને ટીપે ટીપે સરોવર ભરાય. વળી કોઈ કાંઇ વિશિષ્ટ સંકટ-નિવારણ કે ઇચ્છાસિદ્ધિની ઇચ્છા રાખતું હોય તેણે લાગલાગટ નવ પૂજનનો મનથી સંકલ્પ કરવો. આ સંકલ્પ માઇમંડળ અર્થાત્ અનેક વ્યક્તિઓના પૂજનસ્થાનસંબંધે જ હોઈ શકે અને છે. પોતાના ઘરની, અર્થાત્ માઇમંદિરની છબી અથવા પ્રતીકના પૂજન કરતાં માઇમંડળના પ્રતીકનું ફળ વિશેષ હોય એ તો અતિસ્પષ્ટ છે.

બ્હેનો તથા ભાઈઓને બેસવાને માટે અલગ વ્યવસ્થાઓ, તથા બને તો અલગ જવા આવવાનાં દ્વારની કાળજી લેઈ શકાય એમ હોય તો ખાસ લેવી. બીજા કોઇ માઇમંદિર માટે, અર્થાત્ કોઈ કુટુંબમાં પૂજવા માટેની માઇછબી આપવાની હોય તો તે મુખ્ય માઇની સાથે પધરાવવી, અને બન્નેની પૂજા કરવી. પૂજા કરવાની વ્યવસ્થા લોકોની અનુકૂળતા પ્રમાણે કરવી. સાંતાક્રુઝ,-માઇમંડળ જેવી સ્થિતિ જો હોય, કે જ્યાં ઘણે લાંબેથી આવનાર પૂજક હોય, તો નવીન નવીન સમુદાય જેમ જેમ આવતા જાય તેમ તેમ તેમને ભજન ગાવાનો, માઈ પાસે જવાનો પ્રથમ અનુકૂળ સુયોગ આપતા જવું, તથા જ્યારે જ્યારે કોઇ જાય ત્યારે લઘુ પ્રસાદ આપવો. લઘુપ્રસાદ એટલે ફકત નામનો, જેમ કે શેપ, સાકરીઆ ચણા, ગમે તેનો ફકત નામનો.

કાર્યક્રમ પ્રમાણે પ્રથમ થોડો સમય ભજનનો, પછી થોડો સમય ઉપદેશ કે પ્રેમની થોડી નાની વાર્તા, સંભાષણ, પછી કોઇ વિશિષ્ટ

જાણવા જેવી હકીકત હોય તો તેને સંબંધે થોડું ઘણું, વળી કોઇ ને માટે વિશિષ્ટ પ્રાર્થના કે શુભેચ્છાસંબંધે કાંઇ સૂચના હોય તો તે, ત્યાર પછી ધૂનો. ધૂનો માઈની, કૃષ્ણની, રામની, ઓમ્કારની ગમે તેની હોઈ શકે, પરંતુ શરૂઆતની પહેલી અને છેવટની ધૂન માઇની હોવી જોઇએ. અહિં કાર્યક્રમનો પહેલો વિભાગ સમાપ્ત થાય છે.

ધૂન પુરી થતે મુખ્ય ઉપાસક પૂજક હોય તેણે ઉભા થઈ જવાનું, અને **જયમાઇ, જયમાઇનો** ઘોષ એક સરખો ચાલુ રાખવાનો. બનતા સુધી જોરદાર અવાજથી. પછી કદી મનમાં, કદી ધીરે સ્વરે, કદી ઉંચે સ્વરે, પરંતુ એકંદર સિદ્ધાન્ત એવો કે કાર્ય પુરૂં થાય ત્યાં સુધી એક સરખું નામ તેને મુખેથી ચાલ્યું રહેવું જોઈએ. ફક્ત પૂજા કરાવનાર તરીકે પોતે છે એ સિવાય બીજો કોઇ પણ વિચાર તેના મગજમાં તે કાર્ય પુરૂં થતા સુધી ના જોઈએ. આંખો પણ ફક્ત પૂજા કરાવવા પુરતી જ જોનારી બની જવી જોઇએ. કોણ આવે છે અને કોણ જાય છે તેની ચિકિત્સા તેના મગજમાં તે વખતે આવી તો તેણે સમજી જ જવું કે આપણામાં યોગ્યતાની ખામી છે.

બે ત્રણ બીજા સંભાવિત સદ્‌ગૃહસ્થોએ સમય જરા પણ જાય નહિ, ઉપાસકને જરા પણ ખોટી થવું ના પડે એમ એકના હાથમાંથી આરતિ પુરી થઈ કે બીજી વ્યક્તિએ લીધી જ છે એવી રીતે બહુજ ઝડપ, સભ્યતા તથા સાવધતાથી કામ લેવું. આરતિ માઇમંડળે છાપી છે; તે નીચે પ્રમાણે છેઃ—

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥
रौद्रायै नमो नित्यायै गौर्यै धाव्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥
कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ।
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।

रूपात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥

श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसंभूता देवकार्यसमुद्यता ॥
उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥

પહેલાં છેક નાનાં છોકરાંથી શરૂઆત કરવી. કોઈને પણ આરતિ કરવાનો આગ્રહ કરવો નહિ. છોકરાંમાં પુરુષ સ્ત્રીનો ભેદ રાખવો નહિ, પણ લગભગ વયનો હિસાબ રાખવો. મોટો નાનો, ગરીબ શ્રીમંત, ઉંચો નીચો, એવો કોઈ પણ જાતનો ભેદ રાખવો નહિ. છોકરાંના હાથમાં આરતિ આપી ઉપાસકે વસ્તુસ્થિતિ જોઈ ને તે પ્રમાણે એક લીટી, એક શ્લોક યથાયોગ્ય ભણીને "જયમાઈ જયમાઈ" કહીને એક એકની આરતિ પતાવવી. છોકરાં થઈ રહ્યા પછી રીતસરની તપાસ કરવી, અથવા સાદ કરવો કે કોઈ રહેતું તો નથી. પછી બે બ્હેનોએ બે પુરુષોનો ચાર્જ લેઈ બધી બ્હેનો પાસે આરતિ કરાવવી. ત્યાર પછી પુરુષોનો વારો. પુરુષો થઈ રહ્યા પછી ફરી કોઈ રહી ગયું હોય તો તે, અને ત્યાર પછી આખરે બધા થઈ રહ્યા પછી ઉપાસકે આરતિ કરવી, અને પછી માઈને સાષ્ટાંગ દંડવત્ કરીને કોઈ છબિઓની પ્રાણપ્રતિષ્ઠા કરવાની હોય, કાર્ડ સાઈઝની અથવા આખી છબીઓની તો તે કાર્ય કરીને નિવૃત્ત થવું.

ઉપાસકે પંદર વીસ કે ત્રીસ મિનિટ વિશ્રાન્તિ લેવી, કે જે દરમ્યાન પ્રસાદ ધરાવેલો હોય તે વ્હેંચવામાં આવે. પ્રસાદ વ્હેંચાયા પછી જે તે જવા માંડે એટલે કાર્યક્રમનો બીજો વિભાગ પુરો થાય છે.

ત્રીજો વિભાગ માઈપાઠ કરવાનો છે. અહીં ખડકી તથા પૂના તથા બેલગામ માઈમંડળના કાર્યક્રમ પ્રમાણે વિગત આપેલી છે.

આ સમયે સ્ત્રી પુરુષ વચ્ચે ભાઇબ્હેનની વિશેષ બલવત્તર ભાવના જોઇએ. અહિં હું લખવાજ બેઠો છું તો લખી નાંખું છું કે આ પાઠની અજબ શક્તિ છે, પણ આખોયે પાઠ ચાલતા સુધી એજ વસ્તુઓ ખાસ સંભાળવાની છે. એક પરસ્ત્રી કે પોતાની સ્ત્રી, પર પુરુષ કે પોતાના પતિ સંબંધી પણ ભાઇબ્હેન સિવાય બીજો ખ્યાલ આવવો ના જોઈએ; તેમજ હું મોટો છું, આ નાનો છે એ કલ્પના પણ ના આવવી જોઇએ. માની આજુબાજુ બાળકો વિંટળાઈને બેઠાં છે એ સિવાય બીજી કલ્પના ના જોઇએ. પછી ફુલની છાબડીઓ, કુંકુમથી રંગિત કરેલા અક્ષત, તેની રકાબીઓ, થાળીઓ તથા છાબડીઓ વ્હેંચી દેવી. ખડકી માઈપૂજન સમયે લગભગ દશથી પંદર હજાર ગુલાબ પુષ્પો માઈને ચઢે છે; અને લગભગ ૩૦૦ માણસો હાજર હોય છે. પોતાના ઇષ્ટદેવસંબંધી કરેલું વિત્તશાઠ્ય પોતાના જ શ્રેયની આડે આવે છે એ નિયમ માઇભિક્તે ખાસ યાદ રાખવાનો છે.

બધી વ્યવસ્થા થઈ ગયા પછી ઉપાસકે પોતાનું યોગ્ય સ્થાન લેવું, તે એ રીતે કે આખોયે પાઠ થતા સુધી માઇમાંજ ચિત્ત તથા નજર રહે. જે પાઠ કરવાનો છે તે આગળ આપવામાં આવ્યો છે.

પહેલું "જય માઈ" ના નામથી સાધારણ વાતાવરણ તૈયાર કરવું. સર્વેએ પુષ્પ અક્ષત ગમે તે માઈ પ્રત્યે દૂરથી ચઢાવવાં ને પછી ગુજરાતીમાં (૧) જુદાં જુદાં માઇમંડળોનાં નામ દેઇ તેમને પ્રણામ કરવા, પછી (૨) આ માર્ગમાં જે મહાવ્યક્તિઓ થઈ ગઈ હોય તેમને પ્રણામ કરવા. કોનાં નામ સ્મરણ કરવાં એ ઉપાસકની ઇચ્છા પ્રમાણે છે, પરંતુ મુખ્યત્વે સાધારણ નીચે પ્રમાણે છે.

માર્કંડેય ઋષિને પ્રણામ, અગત્સ્ય લોપામુદ્રા ઋષિપતિપત્નીને પ્રણામ, દુર્વાસા ઋષિને પ્રણામ, ગુરુ દત્તાત્રેયને પ્રણામ, વિષ્ણુ અવતાર પરશુરામને પ્રણામ, પૃથ્વીરાજમિત્ર ભ્હારોટચંદને પ્રણામ,

ભવાનીતલવરધારી શ્રી શિવાજી મહારાજને પ્રણામ, નાથ ભવાનને પ્રણામ, વલ્લભ ધોળાને પ્રણામ, માતાસ્વરૂપ સુરતનિવાસી શ્રી શિવદત્ત શુક્લજીને પ્રણામ, શાસ્ત્રવિશારદ ભકત ભાસ્કરરાયજીને પ્રણામ, પરમહંસ શ્રી રામકૃષ્ણ પ્રભુને પ્રણામ, ભકત શ્રી રામપ્રસાદજીને પ્રણામ, અંબાભકત શ્રી અમીચંદને પ્રણામ, માઇસ્થાપક માર્કંડભાઈને પ્રણામ, માઇભિકત શ્રીયુત કૌશિકરામભાઈને પ્રણામ, માઇભિક્ત શ્રીયુત કાંતિલાલ દેસાઈને પ્રણામ, માઇભિકત શ્રી કેશવલાલભાઈને પ્રણામ, માઈને પ્રણામ, સર્વ માઇભગિનીઓને પ્રણામ, સર્વ માઇબંધુઓને પ્રણામ.

આટલું થયા પછી રીતસરનો જપ, મંત્ર તથા પાઠ શરૂ થાય છે.

નામજપ

(૧) મા, મા, મા, મા, મા, મા, મા, મા, મા, મા, મા, મા, મા, મા.
(૨) માઈ, માઈ, માઈ, માઈ, માઈ, માઈ, માઈ, માઈ, માઈ, માઈ, માઈ.
(૩) જય માઈ, જય માઈ, જય માઈ, જય માઈ, જય માઈ, જય માઈ.
(૪) જય માર્કંડ માઈ, જય માર્કંડ માઈ, જય માર્કંડ માઈ, જય માર્કંડ માઈ.
(૫) જય માર્કંડરૂપ માઈ, જય માર્કંડરૂપ માઈ, જય માર્કંડરૂપ માઈ.
(૬) જય માર્કંડરૂપ માર્કંડ માઈ, જય માર્કંડરૂપ માર્કંડ માઈ, જય માર્કંડરૂપ માર્કંડ માઈ.

મંત્રઘોષ.

(૧) **ऐं, ऐं, ऐं, ऐं, ऐं, ऐं, ऐं, ऐं, ऐं, ऐं.**
(૨) **ॐ, ॐ, ॐ, ॐ, ॐ, ॐ, ॐ, ॐ, ॐ.**
(૩) **ॐ ऐं ह्रीं श्रीं, ॐ ऐं ह्रीं श्रीं, ॐ ऐं ह्रीं श्रीं.**
(૪) **ए ह्रीं श्रीं क्लीं, ऐं ह्रीं श्रीं क्लीं, ऐं ह्रीं श्रीं क्लीं.**
(૫) **ऐं, ऐं, ऐं, ऐं, ऐं, ऐं. माई, माई, माई, माई, माई, माई.**

(૬) ऐं श्रीं जय माई, ॐ श्रीं जय माई, ऐं श्रीं जय माई, ॐ श्रीं जय माई.

(૭) ऐं ह्रीं श्रीं क्लीं जय माई, ऐं ह्रीं श्रीं क्लीं जय माई.

(૮) ऐं क्लीं सौः, ऐं क्लीं सौः, ऐं क्लीं सौः.

(૯) क ए ई ल ह्रीं, ह स क ह ल ह्रीं, स क ल ह्रीं, ऐं

જય માઈ, જય માઈ, જય માઈ.

પાઠ

આવાહનસ્તુતિ.

(૧) अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ जय माई.

જય માઈના નામના ઉચ્ચારે અથવા તેવી બીજી કોઈ સંજ્ઞા થતાં પુષ્પવૃષ્ટિ કે અક્ષતવૃષ્ટિ કરવી.

(૨) गुरुभ्यो नमः गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः।
आचार्यसिद्धेश्वरपादुकाभ्यो नमः माईपादुकाभ्यः ॥
जय माई.

(૩) जय माई जय माई जय पृथ्वी माई त्वं धारय मां माई.
पवित्रं कुरु चासनम ॥ जय माई

(૪) ऐं अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ जय माई.

(૫) जय माई, जय माई, जय माई, जय माई, जय माई, जय माई, जय माई.

(૬) ॐ गौर्या सह रुद्राय नमः, ॐ स्वरया सह विरिंचये नमः,
ॐ लक्ष्म्या सह हृषीकेशाय नमः, ॐ ऐं महाकाल्यै नमः,
ॐ ह्रीं महालक्ष्म्यै नमः, ॐ क्लीं महासरस्वत्यै नमः,
ऐं अष्टभुजायै नमः ह्रीं अष्टादशभुजायै नमः,
क्लीं दशाननायै नमः, महिषाय नमः सिंहाय नमः
कालाय नमः मृत्यवे नमः ॥ जय माई.

(७) ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ जय माई.

(८) अपराधसहस्राणि क्रियंतेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥
मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥
अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदंबिके ।
इदानीमनुकंप्योऽहं यथेच्छसि तथा कुरु ॥
अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥ जय माई.

(९) खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥
अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुंडिकां
दण्डं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥
घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ।

गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥ जयमाई.

(१०) विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रदरालिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥
जय माई.

(११) कुलदेवी कुलांगना कुलान्तस्था कुलयोगिनी ।
कुलोत्तीर्णा कुलतारिणी कुलोद्धारिणी ॥ जय माई.

(१२) कुमारी च त्रिमूर्त्तिश्च कल्याणी रोहिणी तथा ।
कालिका चंडिका चैव शांभवी संस्मृता तथा ॥
दुर्गा सुभद्रा चैता हि कुमार्यो नव कीर्तिताः ॥
जय माई जय माई.

(१३) प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ।
तृतीयं चंद्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥
पञ्चमं स्कंदमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रिश्च महागौरीति चाष्टमम् ॥
नवमं सिद्धिदात्री च नव दुर्गाः प्रकीर्तिताः ॥ जय माई.

(१४) मातंगी भुवनेश्वरी च बगला धूमावती भैरवी ।
तारा छिन्नशिरोधरा भगवती श्यामा रमा सुंदरी ॥
जय माई.

(१५) बालार्कमंडलाभासां चतुर्बाहुत्रिलोचनाम् ।
पाशांकुशशरांश्चापं धारयन्तीं शिवां भजे ॥ जय माई.

(१६) बालप्रेम समुल्लसच्च हृदयं यागेन पद्मश्रिया
निष्कामं च वरेण विश्वजनताशुश्रूषणं यत्नतः ।
भक्तिं संयममंकुशेन शरणं स्वाहंपरित्यागतः
ध्यायामो दिशतीं ध्वजेन परमां माई जगत्पावनीम् ॥

(૧૭) वात्सल्यामृतवर्षिणीं रसमयीं कारुण्यकल्लोलिनीं
भक्तानन्दकरीं च विश्वजननीं पापात्कलौ तारिणीम् ।
मायाशक्तिपरां प्रपत्तिसुलभां प्रीत्या रतां सर्वतः
मार्कण्डेयनुतां स्मितां वरयुतां माई वयं संश्रिताः ॥
जय माई.

(૧૮) આરતિ (પૂર્વોક્ત)

(૧૯) अथ खड्गमाला प्रारभ्यते । जय माई.

(૨૦) हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शिवाय गुरवे नमः ॥
गणेशं भुवनेशीं च वाग्देवीं नकुलीं क्रमात् ।
त्रिपुरां ब्रह्ममंत्रं च शैवं पञ्चाक्षरं पठेत् ॥ जयमाई.

(૨૧) ॐ ऐं ह्रीं श्रीं श्रीं ह्रीं ऐं ॐ समयिनि
मदिरानन्दसुंदरि समस्तसुरासुरवन्दिते ॥ जयमाई.

(૨૨) मदीयं शरीरं रक्ष रक्ष परमेश्वरि हुंफट्स्वाहा ।
ॐभूः स्वाहा ॐ भुवः स्वाहा ॐस्वः स्वाहा ॐभूर्भुवः
स्वःस्वाहा ।
नरांत्रमालाभरणभूषिते महाकौलिनि महाब्रह्मवादिनि
महाघनोन्मादकारिणि महाभोगप्रदेऽस्मदीयं शरीरं वज्र-
मयं कुरुकुरु । दुर्जनान्हनहन महीपालान्क्षोभय क्षोभय
चक्रं भंजय भंजय जयंकरि गगनगामि समलवरयूं रम-
लवरयूं यमलवरयूं भमलवरयूं श्रीभैरवि प्रसीद प्रसीद
स्वाहा जयमाई.

(૨૩) देवी रक्षतु दिव्यांगी दिव्यांगं भोगदायिनी । रक्ष रक्ष
महादेवि शरीरं परमेश्वरि ॥ जयमाई.

(૨૪) ऐं ह्रीं श्रीं अरुणां करुणातरंगिताक्षीं
धृतपाशांकुशबाणचापहस्ताम् ॥ जयमाई.

(૨૫) ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरि । जयमाई.

(२६) हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेवि अस्त्रदेवि । जयमाई

(२७) कामेश्वरि भगमालिनि, नित्यक्लिन्ने, भेरुंडे, वह्निवासिनि, महावज्रेश्वरि, शिवदूति, त्वरिते, कुलसुन्दरि, नित्ये, नीलपताके, विजये, सर्वमंगले, ज्वालामालिनि, चित्रे, महानित्ये.

(२८) परमेश्वरपरमेश्वरि, मित्रीशमयि, षष्ठीशमयि, उड्डीशमयि, चर्यानाथमयि, लोपामुद्रामयि, अगस्त्यमयि, कालतापनमयि, धर्माचार्यमयि, मुक्तकेशीश्वरमयि, दीपकलानाथमयि, विष्णुदेवमयि, प्रभाकरदेवमयि, तेजोदेवमयि, मनोजदेवमयि, कल्याणदेवमयि, रत्नदेवमयि, वासुदेवमयि, श्रीरामानन्दमयि ॥ जयमाई

(२९) अणिमासिद्धे, लघिमासिद्धे, महिमासिद्धे, ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे, इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे, जयमाई.

(३०) ब्राह्मि, माहेश्वरि, कौमारि, वैष्णवि, वाराहि, माहेन्द्रि, चामुण्डे, महालक्ष्मि, जयमाई.

(३१) सर्वसंक्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि, सर्ववशंकरि, सर्वोन्मादिनि, सर्वमहांकुशे, सर्वखेचरि, सर्वबीजे, सर्वयोने, सर्वत्रिखण्डे, त्रैलोक्यमोहनचक्रस्वामिनि, प्रकटयोगिनि ॥ जयमाई.

(३२) कामाकर्षिणि, बुद्ध्याकर्षिणि, अहंकाराकर्षिणि, शब्दाकर्षिणि, स्पर्शाकर्षिणि, रूपाकर्षिणि, रसाकर्षिणि, गन्धाकर्षिणि, चित्ताकर्षिणि, धैर्याकर्षिणि, स्मृत्याकर्षिणि, नामाकर्षिणि, बीजाकर्षिणि, आत्माकर्षिणि, अमृताकर्षिणि, शरीराकर्षिणि, सर्वाशापरिपूरकचक्रस्वामिनि, गुप्तयोगिनि ॥ जयमाई.

(३३) अनंगकुसुमे, अनंगमेखले, अनंगमदने, अनंगमदनातुरे, अनंगरेखे, अनंगवेगिनि, अनंगांकुशे, अनंगमालिनि, सर्वसंक्षोभणचक्रस्वामिनि, गुप्ततरयोगिनि ॥ जयमाई.

(३४) सर्वसंक्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि, सर्वाह्लादिनि, सर्वसंमोहिनि, सर्वस्तंभिनि, सर्वजृंभिणि, सर्ववशंकरि, सर्वरंजिनि, सर्वोन्मादिनि, सर्वार्थसाधिनि, सर्वसंपत्पूरिणि, सर्वमंत्रमयि, सर्वद्वंद्वक्षयंकरि, सर्वसौभाग्यदायकचक्रस्वामिनि संप्रदाययोगिनि ॥ जयमाई.

(३५) सर्वसिद्धिप्रदे, सर्वसंपत्प्रदे, सर्वप्रियंकरि, सर्वमंगलकारिणि, सर्वकामप्रदे, सर्वदुःखविमोचिनि, सर्वमृत्युप्रशमनि, सर्वविघ्ननिवारिणि, सर्वांगसुंदरि, सर्वसौभाग्यदायिनि, सर्वार्थसाधकचक्रस्वामिनि कुलोत्तीर्णयोगिनि ॥ जयमाई.

(३६) सर्वज्ञे, सर्वशक्ते, सर्वैश्वर्यप्रदे, सर्वज्ञानमयि, सर्वव्याधिविनाशिनि, सर्वाधारस्वरूपे, सर्वपापहरे, सर्वानन्दमयि, सर्वरक्षास्वरूपिणि, सर्वेप्सितप्रदे, सर्वरक्षाकरचक्रस्वामिनि, निगर्भयोगिनि ॥ जयमाई.

(३७) वशिनि, कामेश्वरि, मोदिनि, विमले, जयिनि, सर्वेश्वरि, कौलिनि, सर्वरोगहरचक्रस्वामिनि, रहस्ययोगिनि ॥ जयमाई.

(३८) बाणिनि, चापिनि, पाशिनि, अंकुशिनि, महाकामेश्वरि, महावज्रेश्वरि, महाभगमालिनि, महाश्रीसुंदरि, सर्वसिद्धिप्रदचक्रस्वामिनि अतिरहस्ययोगिनि ॥ जयमाई.

(३९) श्रीमहाभट्टारिके सर्वानन्दमयचक्रस्वामिनि, परापररहस्ययोगिनि ॥ जयमाई.

(४०) त्रिपुरे, त्रिपुरेशि, त्रिपुरसुन्दरि, त्रिपुरवासिनि, त्रिपुराश्रि, त्रिपुरमालिनि, त्रिपुरासिद्धे, त्रिपुरांबे, महात्रिपुरसुंदरि ॥ जयमाई.

(४१) महामहेश्वरि, महामहाराज्ञि, महामहाशक्ते, महामहागुप्ते, महामहाज्ञप्ते, महामहानन्दे, महामहास्पन्दे, महामहाशये, महामहाश्रीचक्रनगरसाम्राज्ञि, नमस्ते, नमस्ते स्वाहा ॐ श्रीं ह्रीं ऐं ॥ जयमाई, जयमाई, जयमाई.

ललितासहस्रनाम.

(१) निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥ जयमाई (२) अनाकलितसादृश्यचिबुकश्रीविराजिता ॥ जयमाई (३) रत्नकिंकिणिकारम्यरशनादामभूषिता ॥ जयमाई. (४) सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ॥ जयमाई. (५) स्वाधीनवल्लभा ॥ जयमाई. (६) सुधासागरमध्यस्था ॥ जयमाई. (७) देवर्षिगणसंघातस्तूयमानात्मवैभवा ॥ जयमाई (८) हरनेत्राग्निसंदग्धकामसंजीवनौषधिः ॥ जयमाई. (९) मूलकूटत्रयकलेवरा ॥ जयमाई (१०) कुलयोगिनी ॥ जयमाई. (११) ब्रह्मग्रंथिविभेदिनी ॥ जयमाई. (१२) बिसतन्तुतनीयसी ॥ जयमाई. (१३) शान्तिमती ॥ जयमाई. (१४) निरत्यया ॥ जयमाई. (१५) सर्वमङ्गला ॥ जयमाई. આ પછી માત્ર સો નામે એટલે કે નીચે પ્રમાણે. (१६) नामरूपविवर्जिता ॥ जयमाई. (१७) व्यापिनी ॥ जयमाई. (१८) मांसनिष्ठा ॥ जयमाई. (१९) दक्षयज्ञविनाशिनी ॥ जयमाई. (२०) सच्चिदानन्दरूपिणी ॥ जयमाई. (२१) रसशेवधिः ॥ जयमाई (२२) नैष्कर्म्या । जयमाई. (२३) ललिताम्बिका ॥ जयमाई.

વિસર્જનસ્તુતિ.

પાઠ પુરો થયા પછી બને ત્યાંસુધી મુખ્ય ઉપાસકે પોતાના હાથે સર્વેને પુષ્પ અક્ષત આપવાં.

આવાહનસ્તુતિના અંકો નીચે પ્રમાણે છેઃ—

૧, ૮, ૯, ૧૦–૧૫ સુધી, ૧૬ વર્જ્ય નહીં, ૧૭.

અપરાધક્ષમા—ફરી મુખ્ય ઉપાસકે પુષ્પ અક્ષત આપવાં. આરતિ અંક ૧૮ બોલી, અંક ૧ તથા ૮ બોલી પુષ્પાંજલિ સમર્પણ કરવી.

ઉદતે ઉદતે,
જયમાઈ, જયમાઈ, જયમાઈ, જયમાઈ, જયમાઈ.

આખાએ પાઠમાં સમય, સ્થિતિ, લોકોની શ્રદ્ધા, તૈયારી, વિગેરેનો વિચાર કરી, પુષ્પ અક્ષતની વિશેષ અથવા સામાન્ય સામગ્રી ઇત્યાદિનો વિચાર મુખ્ય ઉપાસકે કરીને જે તે એને ઇચ્છા થાય તે પ્રમાણે તેવો વિવેક વાપરીને આ એક માત્ર સાધારણ સૂચના માનીને પોતાનોજ પ્રયોગ પોતાની ઇચ્છા પ્રમાણે યોજીને પુરો કરવો.

કોઈ સમયે આથી પણ વધારે પુષ્પ ચઢાવવાની અનુકૂળતા જણાઇ આવે અથવા કોઈ વ્યક્તિને ઇચ્છા થાય તો દરેક આખો શ્લોક ભણી એકેક પુષ્પ ચઢાવવું, તથા છેવટનો અર્ધો શ્લોક **ललिताम्बिका** સુધીનો ભણી એક પુષ્પ ચઢાવવું. (એકંદરે ૧૮૩ પુષ્પ) દશ દશ નામની પણ નિશાની કરી છેઃ મતલબ પ્રત્યેક નામ–પરત્વે, પ્રત્યેક શ્લોક–પરત્વે, અથવા પ્રત્યેક દશ નામ–પરત્વે ૧૦૦૦, ૧૮૩, અથવા ૧૦૦ પુષ્પ ચઢાવી શકાય છે.

ललितासहस्रनाम ।

ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।
चिदग्निकुण्डसंभूता देवकार्यसमुद्यता ॥ १ ॥
उद्यद्भानुसहस्राभा चतुर्बाहुसमन्विता ।
रागस्वरूपपाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥ २ ॥
मनोरूपेक्षुकोदण्डा पञ्चतन्मात्रसायका ।
निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डला ॥ ३ ॥
चम्पकाशोकपुन्नागसौगन्धिकलसत्कचा ।
कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डिता ॥ ४ ॥
अष्टमीचन्द्रविभ्राजदलिकस्थलशोभिता ।
मुखचन्द्रकलङ्काभमृगनाभिविशेषका ॥ ५ ॥
वदनस्मरमाङ्गल्यगृहतोरणचिल्लिका ।
वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचना ॥ ६ ॥
नवचम्पकपुष्पाभनासादण्डविराजिता ।
ताराकान्तितिरस्कारिनासाभरणभासुरा ॥ ७ ॥
कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरा ।
ताटङ्कयुगलीभूततपनोडुपमण्डला ॥ ८ ॥
पद्मरागशिलादर्शपरिभाविकपोलभूः ।
नवविद्रुमबिम्बश्रीन्यक्कारिरदनच्छदा ॥ ९ ॥
शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वला ।
कर्पूरवीटिकामोदसमाकर्षिदिगन्तरा ॥ १० ॥

निजसंल्लापमाधुर्यविनिर्भर्त्सितकच्छपी ।
मन्दस्मितप्रभापूरमज्जत्कामेशमानसा ॥ ११ ॥
अनाकलितसादृश्यचिबुकश्रीविराजिता ।
कामेशबद्धमाङ्गल्यसूत्रशोभितकन्धरा ॥ १२ ॥
कनकाङ्गदकेयूरकमनीयभुजान्विता ।
रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्विता ॥ १३ ॥
कामेश्वरप्रेमरत्नमणिप्रतिपणस्तनी ।
नाभ्यालवालरोमालिलताफलकुचद्वयी ॥ १४ ॥
लक्ष्यरोमलताधारतासमुन्नेयमध्यमा ।
स्तनभारदलन्मध्यपट्टबन्धवलित्रया ॥ १५ ॥
अरुणारुणकौसुम्भवस्त्रभास्वत्कटीतटी ।
रत्नकिङ्किणिकारम्यरशनादामभूषिता ॥ १६ ॥
कामेशज्ञातसौभाग्यमार्दवोरुद्वयान्विता ।
माणिक्यमुकुटाकारजानुद्वयविराजिता ॥ १७ ॥
इन्द्रगोपपरिक्षिप्तस्मरतूणाभजङ्घिका ।
गूढगुल्फा कूर्मपृष्ठजयिष्णुप्रपदान्विता ॥ १८ ॥
नखदीधितिसंछन्ननमज्जनतमोगुणा ।
पदद्वयप्रभाजालपराकृतसरोरुहा ॥ १९ ॥
सिञ्जानमणिमञ्जीरमण्डितश्रीपदाम्बुजा ।
मरालीमन्दगमना महालावण्यशेवधिः ॥ २० ॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरणभूषिता ।
शिवकामेश्वराङ्कस्था शिवा स्वाधीनवल्लभा ॥ २१ ॥

सुमेरुशृङ्गमध्यस्था श्रीमन्नगरनायिका ।
चिन्तामणिगृहान्तस्था पञ्चब्रह्मासनस्थिता ॥ २२ ॥
महापद्माटवीसंस्था कदम्बवनवासिनी ।
सुधासागरमध्यस्था कामाक्षी कामदायिनी ॥ २३ ॥
देवर्षिगणसंघातस्तूयमानात्मवैभवा ।
भण्डासुरवधोद्युक्तशक्तिसेनासमन्विता ॥ २४ ॥
संपत्करी समारूढसिंधुरव्रजसेविता ।
अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृता ॥ २५ ॥
चक्रराजरथारूढसर्वायुधपरिष्कृता ।
गेयचक्ररथारूढमन्त्रिणीपरिसेविता ॥ २६ ॥
किरिचक्ररथारूढदण्डनाथपुरस्कृता ।
ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगा ॥ २७ ॥
भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्षिता ।
नित्यापराक्रमाटोपनिरीक्षणसमुत्सुका ॥ २८ ॥
भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दिता ।
मन्त्रिण्यम्बाविरचितविषङ्गवधतोषिता ॥ २९ ॥
विशुक्रप्राणहरणवाराहीवीर्यनन्दिता ।
कामेश्वरमुखालोककल्पितश्रीगणेश्वरा ॥ ३० ॥
महागणेशनिर्भिन्नविघ्नयन्त्रप्रहर्षिता ।
भण्डासुरेन्द्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी ॥ ३१ ॥
कराङ्गुलिनखोत्पन्ननारायणदशाकृतिः ।
महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका ॥ ३२ ॥

कामेश्वरास्त्रनिर्दग्धसभण्डासुरशून्यका ।
ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवा ॥ ३३ ॥
हरनेत्राग्निसंदग्धकामसंजीवनौषधिः ।
श्रीमद्वाग्भवकूटैकस्वरूपमुखपङ्कजा ॥ ३४ ॥
कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिणी ।
शक्तिकूटैकतापन्नकट्यधोभागधारिणी ॥ ३५ ॥
मूलमन्त्रात्मिका मूलकूटत्रयकलेवरा ।
कुलामृतैकरसिका कुलसंकेतपालिनी ॥ ३६ ॥
कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचारतत्परा ॥ ३७ ॥
मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी ।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥ ३८ ॥
आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी ।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥ ३९ ॥
तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तुतनीयसी ॥ ४० ॥
भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥ ४१ ॥
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ४२ ॥
शांकरी श्रीकरी साध्वी शरच्चन्द्रनिभानना ।
शातोदरी शान्तिमती निराधारा निरञ्जना ॥ ४३ ॥

निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥ ४४ ॥
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ४५ ॥
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ४६ ॥
निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥ ४७ ॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निःसंशया संशयघ्नी निर्भवा भवनाशिनी ॥ ४८ ॥
निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥ ४९ ॥
निस्तुला नीलचिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ ५० ॥
दुष्टदूरा दुराचारशमनी दोषवर्जिता ।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥ ५१ ॥
सर्वशक्तिमयी सर्वमङ्गला सद्गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्वमन्त्रस्वरूपिणी ॥ ५२ ॥
सर्वयन्त्रात्मिका सर्वतंत्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥ ५३ ॥
महारूपा महापूज्या महापातकनाशिनी ।
महामाया महासत्त्वा महाशक्तिर्महारतिः ॥ ५४ ॥

महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥ ५५ ॥
महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायागक्रमाराध्या महाभैरवपूजिता ॥ ५६ ॥
महेश्वरमहाकल्पमहाताण्डवसाक्षिणी ।
महाकामेशमहिषी महात्रिपुरसुन्दरी ॥ ५७ ॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी ।
महाचतुःषष्टिकोटियोगिनी गणसेविता ॥ ५८ ॥
मनुविद्या चन्द्रविद्या चन्द्रमण्डलमध्यगा ।
चारुरूपा चारुहासा चारुचन्द्रकलाधरा ॥ ५९ ॥
चराचरजगन्नाथा चक्रराजनिकेतना ।
पार्वती पद्मनयना पद्मरागसमप्रभा ॥ ६० ॥
पञ्चप्रेतासनासीना पञ्चब्रह्मस्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञानघनरूपिणी ॥ ६१ ॥
ध्यानध्यातृध्येयरूपा धर्माधर्मविवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ६२ ॥
सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता ।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥ ६३ ॥
संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ।
सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ॥ ६४ ॥
भानुमण्डलमध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभसहोदरी ॥ ६५ ॥

उन्मेषनिमिषोत्पन्नविपन्नभुवनावली ।
सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ॥ ६६ ॥
आब्रह्मकीटजननी वर्णाश्रमविधायिनी ।
निजाज्ञारूपनिगमा पुण्यापुण्यफलप्रदा ॥ ६७ ॥
श्रुतिसीमन्तसिन्दूरीकृतपादाब्जधूलिका ।
सकलागमसंदोहशुक्तिसंपुटमौक्तिका ॥ ६८ ॥
पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अम्बिकाऽनादिनिधना हरिब्रह्मेन्द्रसेविता ॥ ६९ ॥
नारायणी नादरूपा नामरूपविवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥ ७० ॥
राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
रञ्जनी रमणी रस्या रणत्किङ्किणिमेखला ॥ ७१ ॥
रमा राकेन्दुवदना रतिरूपा रतिप्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥ ७२ ॥
काम्या कामकलारूपा कदम्बकुसुमप्रिया ।
कल्याणी जगतीकन्दा करुणारससागरा ॥ ७३ ॥
कलावती कलालापा कान्ता कादम्बरीप्रिया ।
वरदा वामनयना वारुणीमदविह्वला ॥ ७४ ॥
विश्वाधिका वेदविद्या विन्ध्याचलनिवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥ ७५ ॥
क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्रक्षेत्रज्ञपालिनी ।
क्षयवृद्धिविनिर्मुक्ता क्षेत्रपालसमर्चिता ॥ ७६ ॥

विजया विमला वन्द्या वन्दारुजनवत्सला ।
वाग्वादिनी वामकेशी वह्निमण्डलवासिनी ॥ ७७ ॥
भक्तिमत्कल्पलतिका पशुपाशविमोचिनी ।
संहृताशेषपाखण्डा सदाचारप्रवर्तिका ॥ ७८ ॥
तापत्रयाग्निसंतप्तसमाह्लादनचन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोपहा ॥ ७९ ॥
चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी ।
स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंततिः ॥ ८० ॥
परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्तमानसहंसिका ॥ ८१ ॥
कामेश्वरप्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गाररससंपूर्णा जया जालन्धरस्थिता ॥ ८२ ॥
ओड्याणपीठनिलया बिन्दुमण्डलवासिनी ।
रहोयागक्रमाराध्या रहस्तर्पणतर्पिता ॥ ८३ ॥
सद्यःप्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।
षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूरिता ॥ ८४ ॥
नित्यक्लिन्ना निरुपमा निर्वाणसुखदायिनी ।
नित्याषोडशिकारूपा श्रीकण्ठार्धशरीरिणी ॥ ८५ ॥
प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्तस्वरूपिणी ॥ ८६ ॥
व्यापिनी विविधाकारा विद्याविद्यास्वरूपिणी ।
महाकामेशनयनकुमुदाह्लादकौमुदी ॥ ८७ ॥

भक्तहार्दतमोभेदभानुमद्भानुसंततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ॥ ८८ ॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशामनोवाचामगोचरा ॥ ८९ ॥
चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका ।
गायत्री व्याहृतिः संध्या द्विजवृन्दनिषेविता ॥ ९० ॥
तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता ।
निःसीममहिमा नित्ययौवना मदशालिनी ॥ ९१ ॥
मदाघूर्णितरक्ताक्षी मदपाटलगण्डभूः ।
चन्दनद्रवदिग्धाङ्गी चाम्पेयकुसुमप्रिया ॥ ९२ ॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौलमार्गतत्परसेविता ॥ ९३ ॥
कुमारगणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥९४॥
तेजोवती त्रिनयना लोलाक्षी कामरूपिणी ।
मालिनी हंसिनी माता मलयाचलवासिनी ॥ ९५ ॥
सुमुखा नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥९६॥
वज्रेश्वरी वामदेवी वयोवस्थाविवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥ ९७ ॥
विशुद्धिचक्रनिलयाऽऽरक्तवर्णा त्रिलोचना ।
खट्वाङ्गादिप्रहरणा वदनैकसमन्विता ॥ ९८ ॥

पायसान्नप्रिया त्वक्स्था पशुलोकभयंकरी ।
अमृतादिमहाशक्तिसंवृता डाकिनीश्वरी ॥ ९९ ॥
अनाहताब्जनिलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्ज्वलाक्षमालादिधरा रुधिरसंस्थिता ॥ १०० ॥
कालरात्र्यादिशक्त्यौघवृता स्निग्धौदनप्रिया ।
महावीरेन्द्रवरदा राकिण्यम्बास्वरूपिणी ॥ १०१ ॥
मणिपूराब्जनिलया वदनत्रयसंयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥ १०२ ॥
रक्तवर्णा मांसनिष्ठा गुडान्नप्रीतमानसा ।
समस्तभक्तसुखदा लाकिन्यम्बास्वरूपिणी ॥ १०३ ॥
स्वाधिष्ठानाम्बुजगता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुधसंपन्ना पीतवर्णातिगर्विता ॥ १०४ ॥
मेदोनिष्ठा मधुप्रीता बन्धिन्यादिसमन्विता ।
दध्यन्नासक्तहृदया काकिनीरूपधारिणी ॥ १०५ ॥
मूलाधाराम्बुजारूढा पञ्चवक्त्राऽस्थिसंस्थिता ।
अङ्कुशादिप्रहरणा वरदादिनिषेविता ॥ १०६ ॥
मुद्गौदनासक्तचित्ता साकिन्यम्बास्वरूपिणी ।
आज्ञाचक्राब्जनिलया शुक्लवर्णा षडानना ॥ १०७ ॥
मज्जासंस्था हंसवती मुख्यशक्तिसमन्विता ।
हरिद्रान्नैकरसिका हाकिनीरूपधारिणी ॥ १०८ ॥
सहस्रदलपद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुधधरा शुक्लसंस्थिता सर्वतोमुखी ॥ १०९ ॥

सर्वौदनप्रीतचित्ता याकिन्यम्बास्वरूपिणी ।
स्वाहा स्वधा मतिर्मेधा श्रुतिस्मृतिरनुत्तमा ॥ ११० ॥
पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवणकीर्तना ।
पुलोमजार्चिता बन्धमोचनी बन्धुरालका ॥ १११ ॥
विमर्शरूपिणी विद्या वियदादिजगत्प्रसूः ।
सर्वव्याधिप्रशमनी सर्वमृत्युनिवारिणी ॥ ११२ ॥
अग्रगण्याऽचिन्त्यरूपा कलिकल्मषनाशिनी ।
कात्यायनी कालहन्त्री कमलाक्षनिषेविता ॥ ११३ ॥
ताम्बूलपूरितमुखी दाडिमीकुसुमप्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥ ११४ ॥
नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ।
मैत्र्यादिवासनालभ्या महाप्रलयसाक्षिणी ॥ ११५ ॥
पराशक्तिः परानिष्ठा प्रज्ञानघनरूपिणी ।
माध्वीपानालसा मत्ता मातृकावर्णरूपिणी ॥ ११६ ॥
महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्यशालिनी ॥ ११७ ॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥ ११८ ॥
कटाक्षकिंकरीभूतकमलाकोटिसेविता ।
शिरस्थिता चन्द्रनिभा भालस्थेन्द्रधनुःप्रभा ॥ ११९ ॥
हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी ॥ १२० ॥

दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥ १२१ ॥
देवेशी दण्डनीतिस्था दहराकाशरूपिणी ।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता ॥ १२२ ॥
कलात्मिका कलानाथा काव्यालापविनोदिनी ।
सचामररमावाणीसव्यदक्षिणसेविता ॥ १२३ ॥
आदिशक्तिरमेयात्मा परमा पावनाकृतिः ।
अनेककोटिब्रह्माण्डजननी दिव्यविग्रहा ॥ १२४ ॥
क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ १२५ ॥
त्र्यक्षरी दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥ ॥१२६ ॥
विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥ १२७ ॥
सर्ववेदान्तसंवेद्या सत्यानन्दस्वरूपिणी ।
लोपामुद्रार्चिता लीलाक्लृप्तब्रह्माण्डमण्डला ॥ १२८ ॥
अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्दयुगंधरा ॥ १२९ ॥
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥ १३० ॥
अष्टमूर्तिरजा जैत्री लोकयात्राविधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥ १३१ ॥

अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्यस्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥ १३२ ॥
भाषारूपा बृहत्सेना भावाभावविवर्जिता ।
सुखाराध्या शुभकरी शोभना सुलभागतिः ॥ १३३ ॥
राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।
राजत्कृपा राजपीठनिवेशितनिजाश्रिता ॥ १३४ ॥
राज्यलक्ष्मीः कोशनाथा चतुरङ्गबलेश्वरी ।
साम्राज्यदायिनी सत्यसंधा सागरमेखला ॥ १३५ ॥
दीक्षिता दैत्यशमनी सर्वलोकवशंकरी ।
सर्वार्थदात्री सावित्री सच्चिदानन्दरूपिणी ॥ १३६ ॥
देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥ १३७ ॥
सर्वोपाधिविनिर्मुक्ता सदाशिवपतिव्रता ।
संप्रदायेश्वरी साध्वी गुरुमण्डलरूपिणी ॥ १३८ ॥
कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥ १३९ ॥
स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्तिरूपिणी ।
सनकादिसमाराध्या शिवज्ञानप्रदायिनी ॥ १४० ॥
चित्कलानन्दलिका प्रेमरूपा प्रियंकरी ।
नामपारायणप्रीता नन्दिविद्या नटेश्वरी ॥ १४१ ॥
मिथ्याजगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥ १४२ ॥

भवदावसुधावृष्टिः पापारण्यदवानला ।
दौर्भाग्यतूलवातूला जराध्वान्तरविप्रभा ॥ १४३ ॥
भाग्याब्धिचन्द्रिका भक्तचित्तकेकिघनाघना ।
रोगपर्वतदम्भोलिर्मृत्युदारुकुठारिका ॥ १४४ ॥
महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णा चण्डिका चण्डमुण्डासुरनिषूदनी ॥ १४५ ॥
क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥ १४६ ॥
स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १४७ ॥
दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥ १४८ ॥
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ १४९ ॥
मार्तण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥ १५० ॥
सत्यज्ञानानन्दरूपा सामरस्यपरायणा ।
कपर्दिनी कलामाला कामधुक्कामरूपिणी ॥ १५१ ॥
कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ १५२ ॥
परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्रविभेदिनी ॥ १५३ ॥

मूर्तामूर्ता नित्यतृप्ता मुनिमानसहंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिणी सती ॥ १५४ ॥
ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ १५५ ॥
प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठरूपिणी ।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥ १५६ ॥
मुकुन्दा मुक्तिनिलया मूलविग्रहरूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्रप्रवर्तिनी ॥ १५७ ॥
छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी ।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥ १५८ ॥
जन्ममृत्युजरातप्तजनविश्रान्तिदायिनी ।
सर्वोपनिषदुद्घुष्टा शान्त्यतीता कलात्मिका ॥ १५९ ॥
गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पनारहिता काष्ठाऽकान्ता कान्तार्धविग्रहा ॥ १६० ॥
कार्यकारणनिर्मुक्ता कामकेलितरङ्गिता ।
कनत्कनकताटङ्का लीलाविग्रहधारिणी ॥ १६१ ॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्रप्रसादिनी ।
अन्तर्मुखसमाराध्या बहिर्मुखसुदुर्लभा ॥ १६२ ॥
त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः ॥१६३॥
संसारपङ्कनिर्मग्नसमुद्धरणपण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमानस्वरूपिणी ॥ १६४ ॥

धर्माधारा धनाध्यक्षा धनधान्यविवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमणकारिणी ॥ १६५ ॥
विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥ १६६ ॥
वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैन्दवासनी ॥ १६७ ॥
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थस्वरूपिणी ।
सामगानप्रिया सौम्या सदाशिवकुटुम्बिनी ॥ १६८ ॥
सव्यापसव्यमार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥ १६९ ॥
चैतन्यार्घ्यसमाराध्या चैतन्यकुसुमप्रिया ।
सदोदिता सदातुष्टा तरुणादित्यपाटला ॥ १७० ॥
दक्षिणादक्षिणाराध्या दरस्मेरमुखाम्बुजा ।
कौलिनीकेवलाऽनर्घ्यकैवल्यफलदायिनी ॥ १७१ ॥
स्तोत्रप्रिया स्तुतिमती श्रुतिसंस्तुतवैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥ १७२ ॥
विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परमोदा मनोमयी ॥ १७३ ॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्चयज्ञप्रिया पञ्चप्रेतमञ्चाधिशायिनी ॥ १७४ ॥
पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शंभुमोहिनी ॥ १७५ ॥

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥१७६॥
बन्धूककुसुमप्रख्या बाला लीलाविनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥ १७७ ॥
सुवासिन्यर्चनप्रीताऽऽशोभना शुद्धमानसा ।
बिन्दुतर्पणसंतुष्टा पूर्वजा त्रिपुराम्बिका ॥ १७८ ॥
दशमुद्रासमाराध्या त्रिपुराश्रीवशंकरी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेयस्वरूपिणी ॥ १७९ ॥
योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
अनघाऽद्भुतचारित्रा वाञ्छितार्थप्रदायिनी ॥ १८० ॥
अभ्यासातिशयज्ञाता षडध्वातीतरूपिणी ।
अव्याजकरुणामूर्तिरज्ञानध्वान्तदीपिका ॥ १८१ ॥
आबालगोपविदिता सर्वानुल्लङ्घ्यशासना ।
श्रीचक्रराजनिलया श्रीमत्त्रिपुरसुन्दरी ॥१८२॥
श्रीशिवाशिवशक्त्यैक्यरूपिणी ललिताम्बिका । ॐ
इति ध्यात्वा मानसैः संपूज्य योनिमुद्रया प्रणमेत् ॥

श्रीहयग्रीव उवाच ॥

ऐं ह्रीं श्रीं

(क) ककाररूपा कल्याणी कल्याणगुणशालिनी ॥
कल्याणशैलनिलया कमनीया कलावती ॥ १ ॥

कमलाक्षी कल्मषघ्नी करुणामृतसागरा ॥
कदंबकाननावासा कदंबकुसुमप्रिया ॥ २ ॥
कंदर्पविद्या कंदर्पजनकापांगवीक्षणा ॥
कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटा ॥ ३ ॥
कलिदोषहरा कंजलोचना कम्रविग्रहा ॥
कर्मादिसाक्षिणी कारयित्री कर्मफलप्रदा ॥ ४ ॥
(ए) एकाररूपा एकाक्षर्येकानेकाक्षराकृतिः ॥
एतत्तदित्यनिर्देश्या एकानंदचिदाकृतिः ॥ ५ ॥
एवमित्यागमाबोध्या एकभक्तिमदर्चिता ॥
एकाग्रचित्तनिर्ध्याता एषणारहिताद्दता ॥ ६ ॥
एलासुगंधिचिकुरा एनःकूटविनाशिनी ॥
एकभोगा एकरसा एकैश्वर्यप्रदायिनी ॥ ७ ॥
एकातपत्रसाम्राज्यप्रदा एकांतपूजिता ॥
एधमानप्रभा एजदनेकजगदीश्वरी ॥ ८ ॥
एकवीरादिसंसेव्या एकप्राभवशालिनी ॥
(ई) ईकाररूपिणीशित्री ईप्सितार्थप्रदायिनी ॥ ९ ॥
ईदृगित्यविनिर्देश्या ईश्वरत्वविधायिनी ॥
ईशानादिब्रह्ममयी ईशित्वाद्यष्टसिद्धिदा ॥ १० ॥
ईक्षित्रीक्षणसृष्टांडकोटिरीश्वरवल्लभा ॥
ईडिता ईश्वरार्धांगशरीरेशाधिदेवता ॥ ११ ॥
ईश्वरप्रेरणकरी ईशतांडवसाक्षिणी ॥
ईश्वरोत्संगनिलया ईतिबाधाविनाशिनी ॥ १२ ॥

ईहाविरहिता ईशशक्तिरीषत्स्मितानना ॥

(ल) लकाररूपा ललिता लक्ष्मीवाणीनिषेविता ॥ १३ ॥

लाकिनी ललनारूपा लसद्दाडिमपाटला ॥

ललंतिकालसत्फाला ललाटनयनार्चिता ॥ १४ ॥

लक्षणोज्ज्वलदिव्यांगी लक्षकोट्यंडनायिका ॥

लक्ष्यार्था लक्षणागम्या लब्धकामा लतातनुः ॥ १५ ॥

ललामराजदलिका लंबमुक्तालतांचिता ॥

लंबोदरप्रसूर्लभ्या लज्जाढ्या लयवर्जिता ॥ १६ ॥

(ह्रीं) ह्रींकाररूपा ह्रींकारनिलया ह्रींपदप्रिया ॥

ह्रींकारबीजा ह्रींकारमंत्रा ह्रींकारलक्षणा ॥ १७ ॥

ह्रींकारजपसुप्रीता ह्रींमती ह्रींविभूषणा ॥

ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा ॥ १८ ॥

ह्रींकारवाच्या ह्रींकारपूज्या ह्रींकारपीठिका ॥

ह्रींकारवेद्या ह्रींकारचिंत्या ह्रीं ह्रींशरीरिणी ॥ १९ ॥

(ह) हकाररूपा हलधृत्पूजिता हरिणेक्षणा ॥

हरप्रिया हराराध्या हरिब्रह्मेंद्रवंदिता ॥ २० ॥

हयारूढासेवितांघ्रिर्हयमेधसमर्चिता ॥

हर्यक्षवाहना हंसवाहना हतदानवा ॥ २१ ॥

हत्यादिपापशमनी हरिदश्वादिसेविता ॥

हस्तिकुंभोत्तुंगकुचा हस्तिकृत्तिप्रियांगना ॥ २२ ॥

हरिद्राकुंकुमादिग्धा हर्यश्वाद्यमरार्चिता ॥

हरिकेशसखी हादिविद्या हालामदालसा ॥ २३ ॥

(स) सकाररूपा सर्वज्ञा सर्वेशी सर्वमंगला ॥
सर्वकर्त्री सर्वभर्त्री सर्वहन्त्री सनातनी ॥ २४ ॥
सर्वानवद्या सर्वांगसुंदरी सर्वसाक्षिणी ॥
सर्वात्मिका सर्वसौख्यदात्री सर्वविमोहिनी ॥ २५ ॥
सर्वाधारा सर्वगता सर्वावगुणवर्जिता ॥
सर्वारुणा सर्वमाता सर्वभूषणभूषिता ॥ २६ ॥

(क) ककारार्था कालहंत्री कामेशी कामितार्थदा ॥
कामसंजीवनी कल्या कठिनस्तनमंडला ॥ २७ ॥
करभोरूः कलानाथमुखी कचजितांबुदा ॥
कटाक्षस्यंदिकरुणा कपालिप्राणनायिका ॥ २८ ॥
कारुण्यविग्रहा कांता कांतिधूतजपावलिः ॥
कलालापा कंबुकंठी करनिर्जितपल्लवा ॥ २९ ॥
कल्पवल्लीसमभुजा कस्तूरीतिलकाञ्चिता ॥

(ह) हकारार्था हंसगतिर्हाटकाभरणोज्ज्वला ॥ ३० ॥
हारहारिकुचाभोगा हाकिनी हल्यवर्जिता ॥
हरित्पतिसमाराध्या हठात्कारहतासुरा ॥ ३१ ॥
हर्षप्रदा हविर्भोक्त्री हार्दसंतमसापहा ॥
हल्लीसलास्यसंतुष्टा हंसमंत्रार्थरूपिणी ॥ ३२ ॥
हानोपादाननिर्मुक्ता हर्षिणी हरिसोदरी ॥
हाहाहूहूमुखस्तुत्या हानिवृद्धिविवर्जिता ॥ ३३ ॥

हैयंगवीनहृदया हरिगोपारुणांशुका ॥

(ल) लकारार्था लतापूज्या लयस्थित्युद्भवेश्वरी ॥ ३४ ॥

लास्यदर्शनसंतुष्टा लाभालाभविवर्जिता ॥

लंघ्येतराज्ञा लावण्यशालिनी लघुसिद्धिदा ॥ ३५ ॥

लाक्षारससवर्णाभा लक्ष्मणाग्रजपूजिता ॥

लभ्येतरा लब्धभक्तिसुलभा लांगलायुधा ॥ ३६ ॥

लग्नचामरहस्तश्रीशारदापरिवीजिता ॥

लज्जापदसमाराध्या लंपटा लकुलेश्वरी ॥ ३७ ॥

लब्धमाना लब्धरसा लब्धसंपत्समुन्नतिः ॥

(ह्रीं) ह्रींकारिणी ह्रींकाराद्या ह्रींमध्या ह्रींशिखामणिः ॥ ३८ ॥

ह्रींकारकुंडाग्निशिखा ह्रींकारशशिचंद्रिका ॥

ह्रींकारभास्कररुचिर्ह्रींकारांभोदचंचला ॥ ३९ ॥

ह्रींकारकंदांकुरिका ह्रींकारैकपरायणा ॥

ह्रींकारदीर्घिकाहंसी ह्रींकारोद्यानकेकिनी ॥ ४० ॥

ह्रींकारारण्यहरिणी ह्रींकारावालवल्लरी ॥

ह्रींकारपंजरशुकी ह्रींकारांगणदीपिका ॥ ४१ ॥

ह्रींकारकंदरासिंही ह्रींकारांभोजभृंगिका ॥

ह्रींकारसुमनोमाध्वी ह्रींकारतरुमंजरी ॥ ४२ ॥

(स) सकाराख्या समरसा सकलागमसंस्तुता ॥

सर्ववेदांततात्पर्यभूमिः सदसदाश्रया ॥ ४३ ॥

सकला सच्चिदानंदा साध्वी सद्गतिदायिनी ॥

सनकादिमुनिध्येया सदाशिवकुटुंबिनी ॥ ४४ ॥

सकलाधिष्ठानरूपा सत्यरूपा समाकृतिः ॥
सर्वप्रपंचनिर्मात्री समानाधिकवार्जिता ॥ ४५ ॥
सर्वोत्तुंगा संगहीना सद्गुणा सकलेष्टदा ॥
(क) ककारिणी काव्यलोला कामेश्वरमनोहरा ॥ ४६ ॥
कामेश्वरप्राणनाडी कामेशोत्संगवासिनी ॥
कामेश्वरालिंगितांगी कामेश्वरसुखप्रदा ॥ ४७ ॥
कामेश्वरप्रणयिनी कामेश्वरविलासिनी ॥
कामेश्वरतपःसिद्धिः कामेश्वरमनःप्रिया ॥ ४८ ॥
कामेश्वरप्राणनाथा कामेश्वरविमोहिनी ॥
कामेश्वरब्रह्मविद्या कामेश्वरगृहेश्वरी ॥ ४९ ॥
कामेश्वराह्लादकरी कामेश्वरमहेश्वरी ॥
कामेश्वरी कामकोटिनिलया कांक्षितार्थदा ॥ ५० ॥
(ल) लकारिणी लब्धरूपा लब्धधीर्लब्धवांछिता ॥
लब्धपापमनोदूरा लब्धाहंकारदुर्गमा ॥ ५१ ॥
लब्धशक्तिर्लब्धदेहा लब्धैश्वर्यसमुन्नतिः ॥
लब्धवृद्धिर्लब्धलीला लब्धयौवनशालिनी ॥ ५२ ॥
लब्धातिशयसर्वांगसौंदर्या लब्धविभ्रमा ॥
लब्धरागा लब्धपतिर्लब्धनानागमस्थितिः ॥ ५३ ॥
लब्धभोगा लब्धसुखा लब्धहर्षाभिपूरिता ॥
(ह्रीं) ह्रींकारमूर्तिर्ह्रींकारसौधशृंगकपोतिका ॥ ५४ ॥
ह्रींकारदुग्धाब्धिसुधा ह्रींकारकमलेंदिरा ॥
ह्रींकारमणिदीपार्चिर्ह्रींकारतरुशारिका ॥ ५५ ॥

ह्रींकारपेटकमणिर्ह्रींकारादर्शबिंबिता ॥
ह्रींकारकोशासिलता ह्रींकारास्थाननर्तकी ॥ ५६ ॥
ह्रींकारशुक्तिकामुक्तामणिर्ह्रींकारबोधिता ॥
ह्रींकारमयसौवर्णस्तंभविद्रुमपुत्रिका ॥ ५७ ॥
ह्रींकारवेदोपनिषद् ह्रींकाराध्वरदक्षिणा ॥
ह्रींकारनंदनारामनवकल्पकवल्लरी ॥ ५८ ॥
ह्रींकारहिमवद्गंगा ह्रींकारार्णवकौस्तुभा ॥
ह्रींकारमंत्रसर्वस्वा ह्रींकारपरसौख्यदा श्रीं ह्रीं ऐं ॥५९।

अनेन श्रीललितात्रिशतीनामस्तोत्रजपाख्येन कर्मणा भगवती श्रीराजराजेश्वरी महात्रिपुरसुंदरीदेवता प्रीयताम्॥ ॐ तत्सत्।

॥ इति श्रीललितात्रिशतीनामस्तोत्रं संपूर्णम् ॥